# 7. बालकः ध्रुवः



पुरा उत्तानपादः नाम एकः राजा आसीत् । तस्य द्वे पत्न्यौ स्तः- एका सुनीतिः अपरा च सुरुचिः । राज्ञी सुरुचिः राज्ञोऽतीव प्रियासीत् । उत्तमः नाम तस्याः पुत्रः आसीत् । सुनीतिः राजानं नातिप्रियासीत् तस्याः पुत्रः ध्रुवः आसीत् ।



एकस्मिन् दिने राजा सुरुचेः पुत्रम् उत्तमम् अङ्के निधाय स्नेहं कुर्वन्नासीत् । तस्मिन् समये सुनीतेः पुत्रः ध्रुवः पितुः अङ्के स्थातुमैच्छत्। तद् दृष्ट्वा विमाता सुरूचिः अब्रवीत् । वत्स ! त्वं राजसिंहासने आरोढुम् अयोग्यः असि यतः त्वम् अन्यस्त्रीगर्भात् उत्पन्नोऽसि। यदि त्वं राजसिंहासने आरोढुम् इच्छसि तर्हि भगवतः नारायणस्य आराधनां कुरु। मम कुक्षौ च आगत्य जन्म गृहाण ।

विमातुः मुखात् एतानि कटु वचनानि श्रुत्वा बालकः ध्रुवः उच्चस्वरेण रोदनमारभत । किन्तु राजा उत्तानपादः इदं सर्वं तूष्णीं भूत्वा पश्यन्नासीत् । अत्रान्तरे बालकः ध्रुवः रोदनं कुर्वन् मातुः सुनीतेः पार्श्वं गतः अवदत् च विमातुः कटु-व्यवहार विषये । पुत्रात् सुरुचेः कटुवचनमाकर्ण्य सुनीतिः संयमेन ध्रुवमब्रवीत् - वत्स ! धैर्यं शान्तिं च धारय । यद्यपि त्वं विमातुः आचरणेन प्रताडितोऽसि तथापि त्वं परार्थे कदापि अमङ्गलं कामनां मा कुरु । यः पुरुषः अन्यान् खिन्नं करोति सः तस्य फलं अवश्यमेव प्राप्नोति। अतः भो वत्स ! त्वं विमातुः कटुसत्यं पालयन् भगवतः नारायणस्य चरणकमलयोः आराधनां कुरु । तपसा तव पूर्वजाः परां शान्तिम् अलभन्त ।

मातुरादेशेन ध्रुवः ईश-ध्यानं प्रति प्रेरणां गृहीत्वा स राजप्रासादं त्यक्त्वा च वनम् अगच्छत् । वने ध्रुवः घोरतपः अकरोत् । तस्य मन्त्रः आसीत् - 'ओम् नमो भगवते वासुदेवाय' ध्रुवस्य तपसा प्रसन्नो भूत्वा भगवान् विष्णुः तस्य समक्षं प्रकटीभूतः ईप्सितं वरं च प्रादात् ।

ध्रुवः स्वर्गलोके अचलं पदं प्राप्तवान् ।

## शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| अपरा | - | दूसरी | अतीव | - | बहुत |
| अङ्के | - | गोद में | निधाय | - | बैठाकर |
| स्थातुम् ऐच्छत् | - | बैठने की इच्छा किया | अब्रवीत् | - | बोली |
| वत्स | - | पुत्र | आरोढुम् | - | चढ़ने के लिए |
| यतः | - | क्योंकि | तर्हि | - | तो |
| कुक्षौ | - | कोख में | आगत्य | - | आ करके |
| गृहाण | - | ले लो | श्रुत्वा | - | सुनकर |
| पार्श्वे | - | पास में | आरभत | - | आरम्भ कर दिया |
| आकर्ण्य | - | सुनकर | तूष्णीं भूत्वा | - | चुप रह कर |
| कदापि | - | कभी भी | अत्रान्तरे | - | इसी बीच में |
| अन्यान् | - | दूसरों को | प्रताड़ितः | - | दुखी किया गया |
| खिन्न | - | दुःखी | परार्थे | - | दूसरे के हित के लिये |
| पराम् | - | श्रेष्ठ, उत्तम | प्राप्नोति | - | प्राप्त करता है |
| अलभन्त | - | प्राप्त किये | प्रादात् | - | दिया, प्रदान किया |
| प्रासादम् | - | महल | प्रकटीभूतः | - | प्रकट हुए (उपस्थित हुए) |
| त्यक्त्वा | - | छोड़कर | ईप्सितम् | - | इच्छित |

## अभ्यासः

### 1. अधोलिखित प्रश्नों के उत्तर संस्कृत भाषा में लिखिए-

1. राज्ञः उत्तानपादस्य कति पत्न्यौ आस्ताम् ?
2. ध्रुवस्य मातुः किं नाम ?
3. ध्रुवस्य माता किं कर्तुम् आदिदेश ?
4. ध्रुवस्य विमातुः नाम किम् ?

### 2. रिक्त स्थानों की पूर्ति कीजिए ।

1. सुनीतेः पुत्रः ............ आसीत् ।
2. ध्रुवः तपस्यां कर्तुं ............ अगच्छत् ।
3. वने .......... तपः अकरोत् ।
4. रुदन् ध्रुवः मातुः सुनीतेः .....................।

### 3. संस्कृत में अनुवाद कीजिए -

1. उत्तानपाद एक राजा था ।
2. सुरुचि उनकी प्रिय रानी थी ।
3. ध्रुव भगवान का भक्त था ।
4. ध्रुव नारायण को प्रणाम करता है ।
5. ध्रुव ने अचल पद प्राप्त किया ।

PF664E

### 4. निम्नलिखित शब्दों से संस्कृत वाक्य बनाइए -

| | | |
|---|---|---|
| 1. ध्रुवः | 2. उत्तानपादः | 3. सुरुचि |
| 4. सुनीतिः | 5. अब्रवीत् | 6. अस्ति |